# Vyoma Linguistic Labs Foundation

( www.vyoma.org | www.sanskritfromhome.org | www.digitalsanskritguru.com )

व्योम-लिङ्ग्विस्टिक्-लाब्स् फौण्डेषन् इत्याख्या संस्था संस्कृत-संस्कृति-संस्काराणां प्रचाराय कटिबद्धा २०१२-तमात् वर्षात् क्रियाशीलाऽस्ति । विश्वे समस्ता लोकाः स्वानुकूले समये स्थले च संस्कृताध्ययनं कर्तुं शक्नुयुः, तन्त्रज्ञानद्वारैव इदं साधयितुं शक्यमिति मत्वा, अनया संस्थया "Sanskrit From Home" इति नाम्ना अन्तर्जालमाध्यमे आरब्धा व्योम-संस्कृत-पाठशाला अद्य आविश्वं प्रसृतेभ्यः उप-अशीतिसहस्रसङ्ख्याकेभ्यः (~८०,०००) अध्येतृभ्यः निःशुल्कं संस्कृतशिक्षणं वितरति । अतः यदा इच्छन्ति, यत्र इच्छन्ति, तदा तत्रैव आसक्तानां हस्तगतो भवति संस्कृतप्रपञ्चः ।

व्योमसंस्थायाः प्रमुखाः कार्यकलापाः -

१) शताधिकानाम् अध्यापकानां संस्कृतभाषा-व्याकरण-स्तोत्र-काव्य-शास्त्रसम्बन्धिनः चतुःशताधिकाः पाठ्यप्रक्रमाः ।

२) प्रायः सर्वेषां पाठानां मुद्रणानि यूट्यूब्-द्वाराऽपि निर्बन्धं विना द्रष्टुं शक्यानि ।

३) निःशुल्करूपेण उपलभ्यमानः App-तन्त्रांशः (Android / iOS) – सर्वा अध्ययनसामग्री, आनुकूल्यं च जनानां हस्तलभ्यम् ।

४) बालानाम्, विद्यालयच्छात्राणाम्, उद्योगिनाम्, गृहिणीनाम्, वयोवृद्धानां च अनुकूलाः भिन्नाः विशिष्टाः प्रक्रमाः ।

५) भाषाध्ययनम्, ग्रन्थाध्ययनम्, शास्त्राध्ययनम् इति सोपानक्रमेण अध्ययनम्, त्रिष्वपि स्तरेषु अधीतस्य विनियोगः इत्ययं पन्थाः ।

६) विद्वद्वरैः संस्थापितानां भिन्नानां संस्कृतसभानां परीक्षार्थम् अध्यापनम् ।

७) बालानां कृते व्योम-सनातन-विद्या-पाठशाला इत्याख्यं सन्ध्यागुरुकुलम् ।

८) भारतीयज्ञानपरम्परायां निहितानां तत्त्वानां प्रसारदृष्ट्या रामायण-गीता-अर्थशास्त्रादिग्रन्थान् अवलम्ब्य परिकल्पिताः प्रक्रमाः ।

९) शुद्धसंस्कृतोच्चारणस्य बहुमुखं लाभं मनसि निधाय स्तोत्रपाठनाय बहुविधाः प्रक्रमाः ।

१०) वेदशास्त्रविदां विदुषां शुद्धोच्चारणसमवेतानि दृश्य-श्राव्योपकरणानि (Audio-Video tools) ।

११) स्तोत्र-व्याकरण-सनातनधर्मसम्बद्धानां पुस्तकानां प्रकाशनम् (१५ पुस्तकानि एतावता प्रकाशितानि)।

१२) संस्कृतोपयोगीनि बहूनि multimedia-उपकरणानि यत्र दृश्यांशाः (animations), क्रीडाः, क्रियाकलापाश्च न केवलं बालानाम्, अपि तु प्रौढानामपि चित्तमाकर्षन्ति, भाषाध्ययनम् आनन्दमयं कुर्वन्ति ।

१३) संस्कृत-भाषा-प्रयोगालयः (Sanskrit Language Lab) - बहुषु विद्यालयेषु महाविद्यालयेषु च प्रतिष्ठापितानि व्योमसंस्थायाः उपकरणानि ।

१४) न केवलं नगरेषु, किन्तु ग्रामेष्वपि संस्कृत-संस्कृति-संस्काराणां प्रचारस्य प्रयासः ।

अस्याः कार्येषु प्रेरकाः सन्ति ज्येष्ठाः मार्गदर्शिगणसदस्याः, ये शैक्षणिकक्षेत्रे, शास्त्राध्ययने, आधुनिकसंस्थानिर्वहणे च कृतभूरिपरिश्रमाः राष्ट्र-समाजहिताय संस्थामिमां सन्मार्गे नेतुं बद्धश्रद्धाः अहर्निशं यतमानाः सन्ति ।